# Shivaproktam Kashikshetramahatmyavarnanam

# શિવપ્રોક્તં કાશીક્ષેત્રમાહાત્મ્યવર્ણનમ્

## Document Information

Text title : Shivaproktam Kashikshetramahatmyavarnanam

File name : shivaproktaMkAshIkShetramAhAtmyavarNanam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 731-782||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં કાશીક્ષેત્રમાહાત્મ્યવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
(શિવપાર્વતીસંવદે)
કાશીવાસોઽભવત્પૂર્વં સાક્ષાન્મુક્તિપ્રદાયકઃ ।
પશ્ય પાશુપતાન્વૃદ્ધાન્ ભસ્મરુદ્રાક્ષભૂષણાન્ ॥ ૭૩૧॥

એતે પાશુપતાઃ શુદ્ધાઃ કાશીં પાશુપતસ્થલીમ્ ।
મહાપદ્યપિ ઘોરાઢ્યાં (ઘોરાયાં) ન ત્યજિષ્યન્તિ
(નૈવ ત્યક્ષ્યન્તિ) સુવ્રતાઃ ॥ ૭૩૨॥

અસઙ્ખ્યેયા હિ તે સર્વે મલ્લિઙ્ગાર્ચનતત્પરાઃ ।
મમૈવારાધનં કૃત્વા તિષ્ઠન્ત્યત્ર મુમુક્ષવઃ ॥ ૭૩૩॥

પશ્યૈતાન્ભસ્મદિગ્ધાઙ્ગાન્ રુદ્રાક્ષાભરણપ્રિયાન્ ।
અનર્ધ્યાર્ઘ્યકરાન્ધન્યાન્મન્નામસ્મરણોત્સુકાન્ ॥ ૭૩૪॥

મહાદેવેત્તિ મામુચ્ચૈર્વદતઃ પ્રીતિપૂર્વકમ્ ।
કથમેતે સમાયાન્તિ પશ્ય પશ્ય વરાનને ॥ ૭૩૫॥

એતદુચ્ચરિતઃ શ્રાવ્યો મહાદેવેત્યયં ધ્વનિઃ ।
અમૃતામ્મૃતભૂતો યઃ શિવે રુચિકરો મમ ॥ ૭૩૬॥

મહાદેવેતિ પીયૂષં પિબન્તીવ પુનઃ પુનઃ ।
પશ્યં પશ્ય પુનઃ પ્રીત્યા મહાદેવેતિ વાદિનઃ ॥ ૭૩૭॥

નાનાદિગ્ભ્યઃ સમાયાન્તિ પશ્ય પાશુપતોત્તમાન્ ।
અર્ઘ્યહસ્તાન્મહાદેવેત્યુચ્ચૈરુચ્ચરતો મુદા ॥ ૭૩૮॥

કથં ભાન્તિ શુચિર્ભૂત્વા (પૂતાત્માનઃ કથં ભાન્તિ)
ભસ્મભાસિતવિગ્રહાઃ ।
સર્વેઽપ્યેતે ભસ્મફાલા મમ પારિષદાઃ શિવે ॥ ૭૩૯॥

મદર્ચનં વિનૈતેષામન્યત્કાર્યં ન દૃશ્યતે ।
એતે કાલત્રયેઽપ્યેવમાગત્યાભ્યર્ચયન્તિ મામ્ ॥ ૭૪૦॥

શિવે પશ્ય મહાશૈવાન્ મુક્તિમણ્ટપસંસ્થિતાન્ ।
પઞ્ચાક્ષરજપાસાક્તાન્ મલ્લિઙ્ગાલોકનોત્સુકાન્ ॥ ૭૪૧॥

રુદ્રાધ્યાયજપાસક્તાન્પશ્ય શૈવાન્ ગિરીન્દ્રજે ।
ધ્યાયન્તિ યામજં નિત્યં પશ્યૈતાન્ શૈવપુઙ્ગવાન્ ॥ ૭૪૨॥

એતે નૃત્યન્તિ શૈવેન્દ્રા મામભ્યર્ચ્ય યથાવિધિ ।
સાષ્ટાઙ્ગં પ્રણમન્ત્યેતે શતધા પશ્ય તાન્ શિવે ॥ ૭૪૩॥

કર્પૂરદીપાન્ધૃત્વૈતે નામાનિ શુભદાનિ મે ।
ગાયન્ત્યેતે ગાનલોલં વિદિત્વા મામજં શિવે ॥ ૭૪૪॥

સર્વઽપ્યેતે નિત્યતૃપ્તા નિત્યાનન્દા નિરામયાઃ ।
ધ્યાયન્તિ સચ્ચિદાનન્દં મામેવૈતે મુદા સદા ॥ ૭૪૫॥

મત્કથાઽઽકર્ણનાસક્તા નિર્વાણપદવાઞ્છયા ।
તિષ્ઠન્ત્યત્રાનિશં દેવિ મામેવ શરણં ગતાઃ ॥ ૭૪૬॥

પશ્ય પશ્ય ગણાન્દેવિ ભૈરવાદીન્વિલોકય ।
સેવન્તે મામજં નિત્યમનન્તવિજયાન્વિતાઃ ॥ ૭૪૭॥

સર્વાન્સુરાધિપાન્પશ્ય મદર્ચનપરાયણાન્ ।
પુરાત્ર કાર્તિકે માસિ ચતુર્દશ્યાં સુરાઃ શિવે ॥ ૭૪૮॥

સાયઙ્કાલે સમાગત્ય પૂજાં કૃત્વા સ્થિતા મુદા ।
તદા દધીચિરર્ઘ્યાદ્યૈર્મામભ્યર્ચ્ય પ્રયત્નતઃ ॥ ૭૪૯॥

સત્વરં ગન્તુમુધુક્તઃ સ મહાર્હમહાસ્તદા ।
તદાતુ મુનયઃ સર્વે બહવસ્તેન સઙ્ગતાઃ ॥ ૭૫૦॥

ગન્તું સમુદ્યતા દેવિ સમ્મર્દોઽભૂત્તદા બહુ ।
તતઃ પરમૃષિગણાઃ સર્વે સમ્પૂજ્ય માં નિશિ ॥ ૭૫૧॥

ભક્ત્યા જાગરણં ચક્રુઃ શ ૃણ્વન્તો મત્કથાં શિવે ।
કાર્તિકસ્ય ચતુર્દશ્યાં બિલ્વૈશ્ચ કનકાહ્વયૈઃ ॥ ૭૫૨॥

દ્રોણપુષ્પૈશ્ચ તે પૂજાં ચક્રુર્મમ મહેશ્વરિ ।
તિલૈઃ સસર્ષપૈઃ શુક્લૈશ્ચક્રુઃ પૂજાં મયિ પ્રિયે ॥ ૭૫૩॥

કૃષ્ણગોઘૃતદીપાનાં મહ્યં સાર્ધં શતત્રયમ્ ।
દત્તં ક્ષીરાન્નમાજ્યાક્તં દત્તં મહ્યં વરાનને ॥ ૭૫૪॥

ધૂપદીપૌ પુનર્દત્તૌ દત્તઃ પુષ્પાઞ્જલિસ્તતઃ ।
પ્રદક્ષિણનમસ્કારાન્કૃત્વા ચ તદનન્તરમ્ ॥ ૭૫૫॥

રાત્રિર્નીતા પ્રયત્નેન મત્કથાશ્રવણાદિભિઃ ।
તતોઽરુણોદયે જાતે સ્નાત્વા તીર્થેઽથ ભસ્મના ॥ ૭૫૬॥

ત્રિપુણ્ડ્રધારણં કૃત્વા કૃત્વા રુદ્રાક્ષધારણમ્ ।
સન્ધ્યાં સમાપ્ય વિશ્વેશં સમભ્યર્ચ્ય યથાવિધિ ॥ ૭૫૭॥

મદ્ભતાન્ભોજયામાસુરન્નૈર્નાનાવિધૈઃ શુભૈઃ ।
યઃ શુક્લોર્જચતુર્દશ્યામુપોષ્ય પ્રયતઃ શિવે ॥ ૭૫૮॥

મામર્ચયતિ વિશ્વેશં સ મુક્તો ભવતિ ધ્રુવમ્ ।
મલ્લિઙ્ગપૂજનં પુણ્યં સર્વદા સર્વકામદમ્ ॥ ૭૫૯॥

ઊર્જશુક્લચતુર્દશ્યાં અર્ચિતં બહુપુણ્યદમ્ ।
કાર્તિકસ્ય ચતુર્દશ્યાં સિતાયાં માં પ્રયત્નતઃ ॥ ૭૬૦॥

યઃ પૂજયતિ પુણ્યાત્મા સ મુક્તો નાત્ર સંશયઃ ।
ઇદં વિશ્વેશ્વરં લિઙ્ગં સાક્ષાન્મદ્રૂપમુત્તમમ્ ॥ ૭૬૧॥

કો વા નાતિપ્રયત્નેન સમારાધયતિ પ્રિયે ।
અસ્ય લિઙ્ગસ્ય માહાત્મ્યં વેદૈર્નજ્ઞાયતે શિવે ॥ ૭૬૨॥

ન વિષ્ણુના બ્રહ્મણા વા કિં તુ તજ્જ્ઞાયતે મયા ।
માહાત્મ્યં જ્ઞાતુમેતસ્ય વેદૈસ્તપ્તં તપઃ પુરા ॥ ૭૬૩॥

વિષ્ણુનાપિ તપસ્તપ્તં બ્રહ્મણાપિ વરાનને ।
એતે તપ્ત્વા મહાઘોરં બહુકાલં પ્રયત્નતઃ ॥ ૭૬૪॥

તતસ્તત્ત્વમવિજ્ઞાય વિરતાસ્તપસઃ શિવે ।
એતાદૃશમિદં લિઙ્ગં સર્વવેદાન્તસંસ્તુતમ્ ॥ ૭૬૫॥

સુરાસુરાર્ચિતં લિઙ્ગં નાનામુનિવરાર્ચિતમ્ ।
મમ લિઙ્ગમિદં દેવિ પૂજિતં ભુક્તિમુક્તિદમ્ ॥ ૭૬૬॥

પૂજયસ્વાદ્ય યત્નેન નવબિલ્વદલાદિભિઃ ।

અભિષેચય મલ્લિઙ્ગં ક્ષીરાદ્યૈર્ભક્તિપૂર્વકમ્ ॥ ૭૬૭॥

તતોઽસ્ય કુરુ લિઙ્ગસ્ય કર્પૂરાદ્યનુલેપનમ્ ।
તતો મન્દારકુસુમૈર્બિલ્વપત્રૈશ્ચ કોટિશઃ ॥ ૭૬૮॥

સમ્પૂજ્ય કુરુ નૈવેદ્યં સઘૃતં ક્ષીરમુત્તમમ્ ।
કૃત્વા પ્રદક્ષિણાદીનિ લિઙ્ગધ્યાનં કુરુષ્વ મે ॥ ૭૬૯॥

નિત્યમેતસ્ય લિઙ્ગસ્ય ભક્તિ કુરુ મનોરમે ।
દૃષ્ટ્વેદં લિઙ્ગમમલં સર્વેઽપ્યભ્યર્ચયન્ત્યતઃ ॥ ૭૭૦॥

પ્રિયે ત્વમપિ યત્નેન કુરુ મલ્લિઙ્ગપૂજનમ્ ।
મમાપિ જાયતે ભક્તિર્મલ્લિઙ્ગાભ્યર્ચને શિવે ॥ ૭૭૧॥

દૃષ્ટ્વેદં લિઙ્ગમમલં કો વા નાભ્યર્ચયિષ્યતિ ।
મમ પ્રિયતરં લિઙ્ગં સર્વદેવસ્તુતં પ્રિયે ॥ ૭૭૨॥

ઇદં લિઙ્ગં સ્વપ્રકાશમેતદ્ભાસૈવ કેવલં ।
વિભાતિ સર્વમેતદ્યદ્દૃશ્યતે સચરાચરમ્ ॥ ૭૭૩॥

નેદં વિભાસયત્યર્કો ન ભાસયતિ ચન્દ્રમાઃ ।
ન તારકા ભાસયન્તિ વિદ્યુતોઽપિ કુતોઽનલઃ ॥ ૭૭૪॥

એતાદૃશમિદં લિઙ્ગ અવિકારં મદાત્મકમ્ ।
દ્રષ્ટવ્યમર્ચનીયં ચ ધ્યાતવ્યં ચ પ્રયત્નતઃ ॥ ૭૭૫॥

સર્વોઽપિ પુણ્યકાલોઽત્ર કાશ્યાં મલ્લિઙ્ગપૂજને ।
વ્યતીપાતાદયો યોગાઃ ભવન્ત્યપિ વરાનને ॥ ૭૭૬॥

સાદરં પ્રતિગૃહ્ણામિ મદ્ભક્તકૃતપૂજનમ્ ॥ ૭૭૭॥

- -

સૂતઃ (ઉવાચ)
ઇતિ શ્રીવિશ્વનાથસ્ય શ્રુત્વા વચનમમ્બિકા ।
ભક્ત્યા વૈશ્વેશ્વરં લિઙ્ગં પૂજયામાસ ચેશ્વરી ॥ ૭૭૮॥

તતસ્તસ્મિન્મહાલિઙ્ગે સર્વદેવશિખામણિઃ ।
ઉમયા સહ સમ્પ્રીતશ્ચકાર વસતિં શિવઃ ॥ ૭૭૯॥

તદેવ લિઙ્ગમધુના બ્રહ્મવિષ્ણ્વાદિભિઃ સુરૈઃ ।
સર્વદા પૂજ્યતે ભક્ત્યા શ્રીમહેશગણૈરપિ ॥ ૭૮૦॥

શ્રીમદ્વિશ્વેશ્વરં લિઙ્ગમાનન્દઘનમદ્વયમ્ ।
શ્રુતં સ્મૃતં વા દૃષ્ટં વા ભુક્તિમુક્તિપ્રદં ધ્રુવમ્ ॥ ૭૮૧॥

શ્રીમદ્વિશ્વેશ્વરં લિઙ્ગં પ્રસઙ્ગાદપિ સંશ્રુતમ્ ।
ચતુર્વર્ગપ્રદં વિપ્રાઃ સત્યં સત્યં મયોચ્યતે ॥ ૭૮૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપાર્વતીસંવદે શિવપ્રોક્તં કાશીક્ષેત્રમાહાત્મ્યવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૭૩૧-૭૮૨॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 731-782..

Notes:
Śiva શિવ, while showing around Kāśī કાશી to Pārvatī પાર્વતી, tells Her about the Pāśupata-s પાશુપતાઃ who reside there while worshiping Him. He mentions about the merits of worshiping His Śivaliṅga શિવલિઙ્ગ in Kāśī કાશી, especially during the Ūrja Śukla Caturdaśī ઊર્જ શુક્લ ચતુર્દશી / Kārtika Sita Caturdaśī કાર્તિક સિત ચતુર્દશી and that all times are benefic for worshiping His Śivaliṅga શિવલિઙ્ગ apart from (malefic ones like) Vyatipāta Yoga વ્યતિપાત યોગ.

Proofread by Ruma Dewan

*Shivaproktam Kashikshetramahatmyavarnanam*
pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*